योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १६७

सप्तषष्ट्यधिकशततमः सर्गः १६७

श्रीवसिष्ठ उवाच ।

आत्मख्यातिरसत्ख्यातिः ख्यातिरख्यातिरन्यथा ।

शब्दार्थदृष्टयस्तज्ज्ञं प्रत्येताः शशशृङ्गवत् ।। १

कदाचनापि नामाङ्ग संभवन्ति न काश्चन ।

शान्तमव्यपदेश्यात्मा ज्ञ आस्तेऽस्तङ्गतेङ्गनः ।। २

एता उद्यन्ति चिन्मात्रादात्मख्यात्यादिका दृशः ।

तच्च शुद्धतरं व्योम तन्मय्येव च दृश्यते ।। ३

अयमात्मा त्वियं ख्यातिरित्यन्तःकलनाभ्रमः ।

न संभवत्यतश्चैनं शब्दं त्यक्त्वा भवार्थभाक् ।। ४

गच्छंस्तिष्ठन्नददपि सर्वे शान्तमतो जगत् ।

आकाशमौनमेवाच्छमच्छिन्नं वाऽप्रवृत्तिमत् ।। ५

नानामहाशब्दमपि शिलामौनमवस्थितम् ।

अनारतं गच्छदपि व्योमवच्छैलवत्स्थितम् ।। ६

नानाविधारम्भमपि महाशून्यमनङ्कितम् ।

पञ्चभूतात्मकमपि खमिवालब्धपञ्चकम् ।। ७

पदार्थसंकुलमपि शून्यं संवित्तिमात्रकम् ।

स्वप्ने महापुरमिव दृष्टमप्यच्छचिन्मयम् ।। ८

सारम्भमप्यनारम्भं संकल्पनगरं यथा ।

आकाशमात्रं भ्रान्त्यात्म स्वप्नस्त्रीसंगमोपमम् ।। ९

अनुभूतमपि व्यर्थं प्रतिबिम्बाङ्गनासमम् ।

नानानुभवनिर्माणं वस्तु शून्यं तु वस्तुतः ।। १०

श्रीराम उवाच ।

जाग्रत्स्वप्नात्मकमिदं मन्ये स्मृत्यैव दृश्यते ।

सद्रूपबाह्यार्थकृता स्मृतिरेवेह कारणम् ।। ११

श्रीवसिष्ठ उवाच ।

यत्तच्चित्काचकच्येन काकतालीयवद्वपुः ।

व्योमात्माऽऽभाति भावानां सत्तामात्रमभित्तिमत् ।। १२

तदेतदविनाशात्म सर्वत्र परमात्मनि ।

सर्वदा विद्यते शान्ते पयसीव तरङ्गकाः ।। १३

निर्निमित्तं स्वरूपात्म तदेतत्परमात्मनि ।

सर्वात्मन्यपि निर्वाणे व्योमात्मनि निरात्मनि ।। १४

यदा यदावभात्यन्तर्येन तेन यथा तथा ।

सर्वदा न कदाचिद्वा यत्र तत्र न किंचन ।। १५

तस्यैव ब्रह्मभानस्य तेनैवं ब्रह्मणात्मना ।

स्वच्छस्यैव स्वभावस्य स्वस्वभावमनुज्झता ।। १६

इदं जाग्रदयं स्वप्नः सुषुप्तं तुर्यमित्यपि ।

कृतं नाम स्वयं चित्वाद्ब्रह्म वात्मेति चात्मनि ।। १७

वस्तुतस्त्वस्ति न स्वप्नो न जाग्रन्न सुषुप्तता ।

न तुर्यं न ततोऽतीतं सर्वं शान्तं परं नभः ।। १८

अथवा सर्वमेवेदं जाग्रद्रूपं सदैव च ।

सर्वदैव च वा स्वप्नः सुषुप्तं सर्वदैव च ।। १९

सर्वदैव च वा तुर्यं तदन्तः सर्वदैव वा ।

तदिदं वा न यद्विद्मो वयमाशान्तरूपिणः ।। २०

इदं फेनो न किंचिद्वा बुद्बुदो वा न कश्चन ।

शून्यताम्भसि चिद्व्योम महार्णवमहोदरे ।। २१

यथा संवेद्यते यद्यत्तथा तदनुभूयते ।

सद्वासद्वा भवत्स्वप्ने व्योम्नीव सदसच्च तत् ।। २२

संवित्कचनमेवेदं यथा भानं विभासते ।
व्योम व्योमनि चिद्रूपं चिद्रूपे विततात्मनि ।। २३
संविच्च चिन्नभोमज्जा सैवंरूपैव सर्वदा ।
नास्तमेति न चोदेति तस्याः स्वाङ्गमिदं जगत् ।।२४
महाप्रलयसर्गाद्या महाप्रलयरात्रयः ।
तस्या एवावयवतां याताः केशनखादिवत् ।। २५
तस्या भानमभानं तद्भास्वरं जिह्ममेव वा ।
नान्यत्स्वभाववत्स्पन्द इव वायोर्महाचितेः ।। २६
तस्मात्किं नाम जाग्रत्स्यात्कः स्वप्नः का सुषुप्तता ।
किं तुर्यं का स्मृतिः केच्छा तुच्छा एताः कुदृष्टयः ।। २७
अन्तःसंवेदनं भाति स्वं बाह्यार्थतया यतः ।
क्व द्वैतं क्व च वार्थश्रीः स्मृतिरेवमतः कुतः ।। २८
तदिदं भाति निर्भित्ति तत्स्वभानं यदात्मना ।
भानोर्नभसि भारूपमेव भूतविवर्जितम् ।। २९
सद्रूपो यदि बाह्योऽर्थो विद्यते तत्तदुत्थिता ।
स्मृतिः कारणतामेतु नामाद्यजगतः स्थितेः ।। ३०
किंतु नास्त्येष बाह्योऽर्थो भूतानामत्यसंभवात् ।
पञ्चानामादिसर्गादौ कारणानामभावतः ।। ३१
शशश्रृङ्गं यथा नास्ति यथा नास्ति खपादपः ।
यथा वन्ध्यासुतो नास्ति यथा नास्त्यसितः शशी ।।३२
तथाऽज्ञप्रतिभातोऽर्थो जगदाद्यहमादिकः ।
अप्रेक्षितोऽस्ति नास्त्येव प्रेक्षितः सन्न कश्चन ।। ३३
यथास्तीदं महाकारं न किंचिदूपमेव वा ।
तत्त्वज्ञविषयं राम तथास्तीदमखण्डितम् ।। ३४
संविद्घननभोमज्जा यथोदेति यदा यदा ।
नित्योदितोपचारेण कल्पितास्तमयोदया ।। ३५

मुधा व्योम्न्येव पृथ्व्यादितया वेत्ति तदा तदा ।

स्वस्यैव तस्य भानस्य धत्ते पृथ्व्यादिकल्पनाम् ।। ३६

स्वमेव भानमाकाशमात्रमेव महाचितिः ।

पृथ्व्यादिव्यपदेशेन पश्चाद्व्यपदिशत्यजा ।। ३७

आकाश एव पृथ्वीयमिति धत्ते स्वसंविदम् ।

मनोराज्यपुरं बाल इव चिन्मात्रमव्ययम् ।। ३८

किं भानं किमभानं स्यात्तस्येति न विकल्प्यते ।

स्पन्दास्पन्दस्वभावं तद्विद्धि वातमिवाम्बरे ।। ३९

यथा भाति चिदाकाशं तथेदमवभासते ।

व्योम व्योम्न्येव नीरूपं नेदं पृथ्व्यादि सत्क्वचित् ।। ४०

यथा भाति चिदाकाशरूपत्वाद्भातमप्यलम् ।

न सन्नासदिति किंचित्तन्न किंचिच्च किंचन ।। ४१

इदमित्थमनित्थं च सद्वाऽसद्वा यथास्थितम् ।

लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ।। ४२

स एव हृदयाकाशे कचन्त्या दृश्यसंविदा ।

बाह्यं ब्रह्माण्डमित्थं च सद्वाऽसद्वा यथास्थितम् ।।४३

किमत्र बाह्यं किं वान्तः किं दृश्यं कास्य दृश्यता ।

शिवं शान्तमशान्तं च सर्वमोमिति शाम्यताम् ।।४४

नो वाच्यवाचकदृशा रहितो विचारः

संपद्यते स च विकल्पमयेन सिद्धौ ।

सिद्धिश्च संभवति तेन विना न काचि.

द्दीपं विना निशि यथा नयनोपलम्भः ।। ४५

तस्मादपास्य परयाऽमलया धियान्तः-

संकल्पकल्पनमनल्पविकल्पजालम् ।

कृत्वा मनः सकलशास्त्रमहार्थनिष्ठ-

मुड्डीय गच्छ पदमुत्तममेकनिष्ठः ।। ४६

इत्यार्षे श्रीवासिष्ठम० वा० दे० मो० नि० उ० जाग्रत्स्वप्नसुषुप्त्यभावप्रतिपादनं नाम सप्तषष्ट्यधिकशततमः सर्गः ।।

१६७ ।।